దైవరాతీయము

అయోనిజా భార్గవః

॥ अयोनिजाविर्भावे वसिष्ठाविर्भावः ॥

॥ तत्र सर्वानुक्रमसूत्रात् –

॥ योऽदृश्यः सम्भूतो वसतीवरीषु गृह्यमाणासु पुष्करे स्थितवान्,
सर्वतः पुष्करं तत्र विश्वे देवा अधारयन् उत्थापयत। ततोऽसौ तपश्चकार,
अदृष्टमिन्द्र मन्यैः ऋषिभिर्यो दृष्टवांस्तपसा पूर्वं सोमभागान् परितुष्टः
शक्रः प्रब्रूते, यस्य सगुणतो नाम जज्ञे वसतः श्रैष्ठ्य कर्मणः।
स सप्तमं मण्डलं वसिष्ठोऽपश्यत् ॥ इति ऋक् सर्वानुक्रमसूत्रम् ७।१)

॥ अग्निं नर्यादिका त्रिंशोऽष्टादशाख्याः ॥१॥

॥ अगस्त्यवसिष्ठयोः मैत्रावरुणयोः वसतीवरीकुम्भात् –
॥ द्वयोः प्रादुर्भावः ॥

॥ तत्रागस्त्यो मारुतांहि हविर्निरूप्तवान्। मित्रावरुणयोर्दीक्षितयोः
उर्वशीमप्सरसं दृष्ट्वा वासतीवरे कुम्भे रेतोऽपतत् ततोऽगस्त्यवसिष्ठा-
वजायेताम् ॥ इति सर्वानुक्रमसूत्रम् ॥ (ऋक् मंडलम् १।१६६।

॥ ई ॐ श्रीः ॥

॥ ॐ भद्रं नो अपि वातय मनः ॥

—

॥ अयोनिजाविर्भावः ॥

॥श्रीमन्नारायणात् पद्मभुवः ब्रह्मणः प्रादुर्भावः ॥

॥ ब्रह्मणो मनसः वसिष्ठाविर्भावः ॥

—

॥ अथ प्रथमा कला ॥

—

१ " श्रीनारायण आदिमः स परमः सन् ज्योतिषः पुरुषः
श्री- लक्ष्मीपरचित्सद्रसत्तमः सच्चेतनः स्वार्चिषः ॥
श्रीशात् तत्परमात्मनः समुदितो ब्रह्मा स्वयं पद्मभूः
श्रीब्रह्मात्मन आन्तरात् सुमनसो जज्ञे वसिष्ठो मुनिः ॥१॥

—

॥ अथ वसिष्ठस्य तस्य तपसा स्वात्मज एव प्रथम जन्मावलोकः ॥
॥ वसिष्ठात्मजानां वसिष्ठ जन्मस्तवनम् ॥ इन्द्रेण वा सह संवादः ॥
" श्वित्यञ्चः ऋजुना (७४) (२) संस्तावो वसिष्ठस्य सपुत्रस्य इन्द्रेण वा-
॥ तत्र प्रथमो मन्त्रः ॥ (संवादः (सूक्तिसूत्रम्)

—

" विद्युतो ज्योतिः परि संजिहानं मित्रावरुणा यदपश्यतां त्वा ॥
तत् ते जन्मोतैकं वसिष्ठागस्त्यो यत् त्वा विश आजभार ॥
— (ऋक् सं. मं. ७।३३।१०)

२ " दिव्यं तं दिवि विद्युतः परिचितं ह्यभ्युज्जिहानं परं
यन् मित्रावरुणौ स्वयं ददृशतु स्तेजोरसैकात्मकौ ॥
तत् ते जन्म परं वसिष्ठ ! विदितं सत्स्वात्मसत्त्वात्मकं
तं त्वां साकमिहाजहार सहसा योगादगस्त्यः स्वयम् ॥२॥

—

॥ द्वितीयो मन्त्रः ॥

" उतासि मैत्रावरुणो वसिष्ठोर्वश्या ब्रह्मन् मनसोऽधि जातः ॥
द्रप्सं स्कन्नं ब्रह्मणा दैव्येन विश्वे देवाः पुष्करे त्वाददन्त ॥(२)

—

३ " त्वं मैत्रावरुणोऽसि मानवमुने ब्रह्मन् वसिष्ठो महान्
उर्वश्याः सरसाच्चितेश्च मनसा योगात् प्रजातो भवान् ॥
स्कन्नं वीर्यमिहावनौ सुमनसो स्नात् सद्रसे पुष्करे
देवा स्ते सकलेन्द्रियाधिपतय स्त्वां ब्रह्मणे वाददुः ॥३॥

—

॥ अथ तृतीयो मन्त्रः ॥

" स प्रकेत उभयस्य प्रविद्वान् सहस्रदान उत वा सदानः ॥
यमेन ततं परिधिं वयिष्यन् अप्सरसः परि जज्ञे वसिष्ठः ॥ ३ ॥

४ " प्राज्ञः सोऽप्युभयस्य सत्वमहो विद्वान् स्वयं दानवान्
प्रश्नेन सहस्रदोऽपरिमितप्रज्ञानदाताऽऽत्मवान् ॥
सम्प्राप्तं परिधिं यमेन विततं योगाद् वयिष्यन् उभयं
सञ्जज्ञे ऽप्सरसो रसात् सुमनसः श्रेष्ठो वसिष्ठो मुनिः ॥ ४ ५

॥ चतुर्थो मन्त्रः ॥

" सत्रे ह जाताविषिता नमोभिः कुम्भे रेतः सिषिचतुः समानम् ॥
ततो ह मान उदियाय मध्यात् ततो जातमृषिमाहुर्वसिष्ठम् ॥ ४ ॥

५ " सत्रे यज्ञपरे स्वदेवयजने तद्यागदीक्षावृतौ
कुम्भे ऽन्तर्वसतीवरीमदधिके रेतः समं पूरितौ ॥
दृष्ट्वाप्सरसं सुदिव्यवपुषं तामुर्वशीं मानिताः
तौ मित्रावरुणौ समं सिषिचतुर्वीर्यं निजं योगतः ॥ ५ ॥

॥ तस्मादेव कुम्भाद् वसिष्ठाविर्भावः ॥

६ तस्मात् कुम्भमुखात् परात् समरसात् मध्यात् महर्षिर्विभुः
सिद्धो योगमुदस्य दिव्यमहिमा मान्यो वसिष्ठो महान् ॥
प्राज्ञो जातमिमं सुदिव्यमहसं प्राहुर्वसिष्ठं द्विजं
प्रत्यक्षं परमं पवित्रमतुलं प्रज्ञानचित्साचिषम् ॥ ६ ॥

॥ पञ्चमो मन्त्रः ॥

" उक्थभृतं सामभृतं बिभर्ति ग्रावाणं बिभ्रत् प्र वदात्यग्रे ॥
उपैनमाध्वं सुमनस्यमाना आ वो गच्छाति प्रतृदो वसिष्ठः ॥

७ " योगादुक्थभृतं बिभर्ति मनसा प्राणं परं बिभ्रतं
ज्ञानात् सामभृतं च बिभ्रदुदयन् ग्रावाणमप्यावदन् ॥
प्रेम्णाऽऽगच्छति वः समक्षमनुजान् प्राज्ञो वसिष्ठो मुनिः
प्रत्यक्षेण मुदाश्रयध्वमभृतं योगेन युष्माः स्वयं
(बोधक वन

८ ॥ विद्युत् - उर्वशी - अप्सरस् शब्दानां पर्यायाः समानविग्रहेकाकवस्तु-
" विद्युद् वाग् दिवि सोच्यते द्युतिमती दिव्यान्द्रचित्ता वाऽवशी
व्याप्नोति स्वचितेऽविश्वमाविता: सा विद्युदेवोर्वशी ॥
प्राणानां स्वयमप्सराः स्वरतः सा विद्युदप्सरिता
ततः योगात् तत्त्वजां गुणात् आत्मा वसिष्ठोऽग्रजः ॥

॥ आदित्यस्यैव तेजोंऽशत्वात्तां योगेन तद्योनिजाविति मतिः ॥

॥ तस्मिन्नर्थे यजुषो मन्त्रवर्णः प्रसिद्धः ॥

" अद्भ्यः सम्भृतः पृथिव्यै रसाच्च। विश्वकर्मणः समवर्तताधि।
तस्य त्वष्टा विदधद्रूपमेति। तत् पुरुषस्य विश्वमाजानमग्रे ॥
(उत्तरनारायण। ते. आ.)

" अद्भ्यः सम्भृतः पृथिव्यै रसाच्च। विश्वकर्मणः समवर्तताधि ॥
तस्य त्वष्टा विदधद्रूपमेति। तन् मर्त्यस्य देवत्वमाजानमग्रे ॥
(शु. यजुः सं. अ. ३१।१७)

२—

९ " प्राग् अद्भ्यः पृथिवीरसाच्च जनितो यो विश्वकर्मात्मनः
ब्रागग्रात् परचेतनात् समुदितो यो विश्वकर्मात्मनः ॥
त्वष्टा तस्य सुरूपमेव रचयन् यो ऽप्येति सूर्यात्मनः
यष्टा सर्वहुतः समस्तजगतो यज्ञस्य सर्वात्मनः ॥ ९ ॥

२—

" तत् पुरुषस्य विश्वमाजानमग्रे ॥ " तन् मर्त्यस्य देवत्वमाजानमग्रे ॥

२—

३० ॥ ज्ञेयं तत् पुरुषस्य जन्म सकलं सृष्ट्यादितो ऽनोदितं
तस्य च ज्ञानमहं सुदिव्यतपसा पूर्वं समस्ताग्रिमम् ॥
तन्मर्त्यस्य भुवीह यौवनपदे रूपाण्यजन्म सर्वोत्तमं
देवत्वं परदेवतात्मकार्चितो राजा न मन्त्रादिमम् ॥ ३० ॥

२—

॥ वासिष्ठजन्मकारणौ तौ मित्रावरुणौ देवतात्मानावेव भवितुमर्हतः, तेजोरसात्मकौ
॥ नैव मानवौ रघोः प्रसिद्धे राजानौ नापि ब्राह्मणौ न पुराणपुरुषौ नापि वानरौ ॥

२—

३१ " तौ मित्रावरुणावुभौ दिविषदौ तेजोरसात्मौ सुरौ
संभूतौ भुवि मातरं च पितरं प्रादुर्विना तौ परौ ॥
न स्यातामिह मानवौ तनुभृतौ न क्षत्रियौ भूसुरौ
नान्यौ वा भवतः पुराणपुरुषौ नो वानरौ नासुरौ ॥ ३१ ॥

२—

॥ शास्त्रस्य लौकिकाविरुद्धं तत्त्वम् ब्रह्मसूत्रे मीमांसया निर्णीतम् ॥

२—

३२ " तत्त्वं तत्र मतं तदेव निखिलं पञ्चाग्निविद्यापरं
भूमौ मीमांसया तत् तदकृते तत्त्वाच्च जन्याकरम् ॥
सिद्धं तत् खलु लौकिके ऽप्यनुमितेस्तद् ब्रह्मसूत्रादितं
सिद्धान्तेन समर्थितं श्रुतिमतं शास्त्रेण मीमांसितम् ॥ ३२

२—

॥ राज्ञः प्रवाहणस्य जैवलेर्मुखात् गौतमाय पञ्चाग्निविद्योपदेशः ॥ उक्तं उ
३३ " राजा संविदितः प्रवाहण इति प्राख्यातवाञ्जैवलिः (बृ. उ.
राज्ञा तेन कृतं प्रशासनमिदं नो लब्धं पूर्वं विप्रकम् ॥ "
स्वान्ते नास्तिकृते तु गौतमकृते तत्त्वोपदेशात्मकं
सर्वेषां सुखदं परं हिततमं पञ्चाग्निविद्यात्मकम् ॥ ३३ ॥

२—

॥ अथ पञ्चाग्निविद्या तत्त्वार्थसमर्थनम् ॥

॥ असौ वाव लोको गौतम ! — अग्निः, तस्मिन्नेतस्मिन्नग्नौ देवाः — श्रद्धां जुह्वति तस्याः आहुतेः सोमो राजा सम्भवति ॥ १ ॥

(१) ॥ असौ लोकः — द्यौः प्रथमोऽग्निः दिव्यः प्रथमः ॥

३४ ॥ लोकोऽसौ प्रथमोऽग्निरत्र विहितो दिव्यः सवित्राऽऽस्थितः
तस्मिन्नग्निमुखेऽखिलेन्द्रियपरा देवाः समे सङ्गताः ॥
श्रद्धां सञ्जुहुवुः सवृत्तिकरसाः श्रद्धामयी सा आपः
तस्या आहुतौ बभूव मनसा सोमो रसात्माऽधिपः ॥ ३४ ॥

(२) ॥ पर्जन्यः लोकः अन्तरिक्षः वैद्युतोऽग्निः द्वितीयः ॥

॥ पर्जन्यो वाव लोको गौतम ! अग्निः, — तस्मिन्नेतस्मिन्नग्नौ देवाः सोमं राजानं जुह्वति, — तस्याः आहुतेः वृष्टिः सम्भवति ॥ २ ॥

३५ ॥ पर्जन्योऽग्निरिहान्तरिक्षसदने सिद्धोऽपरो वैद्युतः
तस्मिन् सोमरसं सुराः सुजुहुवुः सन्मानसं वैद्युताः ॥
तस्या आहुतितो महः प्रकृतितः सञ्चेतना कारया
वृष्टिः सम्भवतीह सद्रसमयी प्रत्यक्षसंदृश्यया ॥ ३५ ॥

(३) अयं लोकः पार्थिवः, सोऽयं पार्थिवोऽग्निः तृतीयः ॥

॥ अयं वाव लोको गौतम ! अग्निः तस्मिन् ... एतस्मिन्नग्नौ देवाः वर्षं जुह्वति तस्या आहुतेरन्नं सम्भवति

३६ ॥ लोकोऽयं पृथिवीयमत्र विदितः सोऽग्निस्तृतीयो हितः
वर्षं तेऽत्र सुराः समेऽपि जुहुवुः सेयं तृतीयाऽऽहुतिः ॥
तस्या वर्षजलाहुतेः प्रकृतिकादन्नं बभूवोर्जितं-
तत् स्विद्दं करणत्रयैककरणं तेजोरसान्वार्जितम् ॥ ३६ ॥

(४) अयं पुरुषो मानवः, सोऽयं वैश्वानरोऽग्निः चतुर्थः ॥

॥ पुरुषो वाव लोको गौतमाग्निः, तस्मिन्नेतस्मिन्नग्नौ देवाः अन्नं जुह्वति, तस्याः आहुतेः रेतः सम्भवति ॥

३७ ॥ तुर्योऽग्निः प्रथितोऽयमत्र पुरुषो वैश्वानरात्माऽर्चिषः
तस्मिन्नन्नमिदं त्रिवृत् प्रजुहुवुर्देवाः स्वधीचित्त्विषः ॥
तस्या आहुतितस्तुरीयकृतितो वैश्वानराग्न्यन्वयात्
तद्रेतो हृदि सम्बभूव महसा सञ्चेतनात्मान्वयम् ॥ ३७ ॥

(५) योषात्मकः योनिरूपकः मातृसत्त्वकः अग्निः पञ्चमः ॥

॥ योषा वाव लोको गौतमाग्निः तस्मिन्नेतस्मिन्नग्नौ देवा रेतो जुह्वति, तस्या आहुतेः पुरुषः सम्भवति ॥

१८ ॥ योऽसौ सम्प्रथितोऽयमग्निरिति सा जाया सती शक्तिका
तस्मिन् सम्प्रति जुहुतीह पुरुषा वीर्यं स्वचिन्तकल्पितकाम् ॥
तस्या आहुतितोऽत्र पञ्चमकृतेः पञ्चाग्नियोगोदितः
संसिद्धः पुरुषो भवत्ययमिह प्रत्यक्षसत्त्वान्वितः ॥१८॥

"इति तु पञ्चम्यामाहुतावापः पुरुषवचसो भवन्ति" इति ॥

१९ ॥ एवं पञ्चमसत्क्रियाहुतिपरे यज्ञे प्रजाप्रापके
कामं सद्गततः प्रजापतिपरे विश्वैकसन्तानके ॥
आपस्ताः पुरुषात्मसत्त्ववचसः श्रद्धा भवन्ति स्वयं
पञ्चाग्निप्रतिपाकसंस्कृतिचिताः श्रेयः प्रदाः सान्वयम् ॥१९॥

॥ आदिसृष्टौ तृतीयाहुतेरेव प्रथमतो मानवशरीरोदयः ॥

२० ॥ या वै वृष्टिजलस्य पूर्वमभवद् भूमौ तृतीयाऽऽहुतिः
प्राक् सृष्टौ मनुजो बभूव महसा तस्यास्तृतीयाहुतेः ॥
मन्वादेरुदितादयोनिजतनोः सास्यान्वयो मानवः
सैवाद्यः पुरुषो बभूव हि महान् सिद्धः स्वयम्भूर्मनुः ॥२०॥

॥ कुम्भशब्दो भूमिबोधकः – आम्भः सन्धारकः ॥

२१ ॥ भूमिः स्यात् कुरिति प्रसिद्धवचना सैवाम्भसा पूरिता
कुम्भोऽयं वसतीवरीसुवचनः सन् सोमयागेरितः ॥
भाष्योऽयं खलु शब्दशास्त्रविधितः कुम्भः सरूपोचितः
कुम्भोऽयं हि पृषोदरादिविदितः शुद्धः सशास्त्रोदितः ॥२१॥

॥ भूतले जलपूर्णं पुष्करम् – कुम्भस्वरूपपरम् ॥

"विश्वेदेवाः पुष्करे त्वा ददन्त ॥(मं.११) "कुम्भे रेतः सिषिचतुः समानम् ।(मं.
॥ इति च उभयोर्मन्त्रान्तरयोः सामानाधिकरण्येन दर्शनात् ॥

२२ ॥ यन् मित्रावरुणात्मनोर्द्विविधदेवर्षुर्मनः सत्त्वनोः
स्कन्नं वीर्यमदोऽत्र पुष्करपदे तेजोरसैकात्मनोः ॥
दैवैराकृतमत्र दिव्यमनुना दिव्यं सुवीर्यं परं
भौमं दिव्यरसान्विरेव भरितं कुम्भात्मकं पुष्करम् ॥२२॥

(मन्त्रदर्शनम्।
वामदेवस्य वा।

॥ अस्मिन् अयोनिजाविर्भावनिके आङ्गिरसस्य मूर्धन्वतः आर्षत्वं "द्वे स्रुती अशृणवं पितॄणाम्" इति॥

॥ तथा च सर्वानुक्रमसूत्रम् - "द्विवैरेकोना- आङ्गिरसो मूर्धन्वान् वामदेव्यो वा, सौर्यो वैश्वानरीयम्" इति॥ (१०।८८।१५)

॥ तत्रेदं वैदिकं औपनिषदं च तत्त्वम्॥

"द्वे स्रुती अशृणवं पितॄणामहं देवानामुत मर्त्यानाम्॥
ताभ्यामिदं विश्वमेजत् समेति यदन्तरा पितरं मातरं च॥
(ऋक्. सं. १०।८८।१५)

२३ "मूर्धन्वताऽऽङ्गिरसो महान् स ऋषिः स्वान्तर्दृशा सन्दृशा
(मु) मूर्धन्येन च चक्षुषा सुतपसा तत्त्वं ददर्शावशः॥
मर्त्यानां च कृते श्रुते च शृणवं ते संश्रिते द्वे स्रुती
देवानां पितॄणां च सत्प्रगतिके मुक्तेः स्थाप्य संसृतेः॥ २३॥

॥ ताभ्यामिदं विश्वमेजत् समेति यदन्तरा पितरं मातरं च॥
("जायस्व - म्रियस्वेत्येतत् तृतीयं स्थानम्।" छा. उ.)

२४ "एजद् विश्वमिदं समेति सततं ताभ्यां स्रुतिभ्यां समं
भ्राम्यच्चक्रमिवैव सन्ततगतेः सम्भ्रामयत् सन्ततम्॥
तार्तीया भुवि मातरं च पितरं स्यादन्तराऽन्या स्रुतिः
जायस्वेति तथा म्रियस्व तदिदं स्थानं तृतीयं श्रुतम्॥ २४॥
(इतीदम् - औपनिषदं तत्त्वम्)

॥ तत्रेदं वैदिकं तत्त्वम् - किञ्चिद् विशिष्टतरम्॥

२५ "तत्त्वं वैदिकमेतदादामुदितं गुह्यं श्रुतं सत्त्वकं
प्रादुर्भावपरं ह्ययोनिजतनोर्भूमेः सकाशात् स्वयम्॥
तेषां जन्म तदत्र मानवतनोर्मातापितृभ्यां विना
बीजक्षेत्रगुणात्मनोर्निहितयोर्द्यावापृथिव्योः समात्॥ २५॥

॥ अत्र द्यावाभूमी दम्पती इवैव मिथुनात्मके भवतः॥
॥ अस्मिन्नर्थे यजुर्मन्त्रवर्णः आरण्यकः॥

"जाया भूमिः पतिर्व्योम मिथुनं ता अतर्पयताम्॥ (तै. आ.)

२६ "जाया भूमिरियं सती वसुमती माता सवित्री सती
जाता सा जननी नृणां स्ववती सम्भाविता वा सती॥
देवो द्यौः सविता ततिः रसभृतां स्त्रोणां नरो ह्युत्तमः
तावेतौ मिथुनं सदाऽजनयतां सन्तानजातं नराः॥ २६॥

॥ तच्चेत्थं तेन द्यावापृथिव्यौ सर्वेषां मातापितरौ प्रभवतः ॥
॥ एतस्मिन्नर्थे दैर्घतमसः आर्षवचः मन्त्रवर्णो भवति ॥

"द्यौर्मे पिता जनिता नाभिरत्र बन्धुर्मे माता पृथिवी महीयम् ॥
उत्तानयोश्चम्वोर्योनिरन्तरत्रा पिता दुहितुर्गर्भमाधात् ॥
(दीर्घतमाः । ऋक्.सं. १।१६४।)

२७ "द्यौर्मे, ऽसौ सविता पिता जनयिता माता महीयं क्षितिः
बन्धुर्मे सकलनाभिरत्र नियतो मध्ये तयोर्वर्तिता ॥
तत्रोर्ध्वाधरयोस्तयोः सुहितयोश्चम्वोरिवोत्तानयोः
योनिश्चान्तरितं पदं जनिपदं स्त्रीपुंस्वसत्त्वाश्रयोः ॥ २७ ॥

॥ पित्रा सवित्रा - दुहितरि पृथिव्यां गर्भाधानम् ॥
" उत्तानयोश्चम्वोर्योनिरन्तरत्रा पिता दुहितुर्गर्भमाधात् ॥

२८ " सूर्यो, ऽसौ जगतां पिता स चितिमान् सिद्धः स्वरस्वान् स्वयं
दूरे सन्निहितोऽथास्य दुहिता दोग्ध्री रसानामियम् ॥
सा, ऽस्यां सन् अवनौ नृणां स्वमुदये बीजं निजं स्पन्दते
स्वान्तः सन्निहितं सतीव भवति गर्भं स्वयं सन्दधे ॥ २८ ॥

॥ तदेतदेव तेजसामयोनिजानामाविर्भावकारणम् ॥

२९ " तत्त्वं दीर्घतमाः सुदीर्घतपसा गुप्तं ददर्शात्मवान्
स्वेनान्तरितेन मन्त्रवचसा प्रोवाच तत् सत्यवान् ॥
अद्यापि तदयोनिजाभवपुषां तेषां नृणां चिह्नितं
आविर्भावसुसंविदादिकरणं प्राचामृषीणां रतम् ॥ २९ ॥

॥ सम्प्रति आर्षमेव वसिष्ठाविर्भावविषये वैदिकं प्रमाणं तन्मूलसिद्धं तत्र सन्दर्शनम् ॥

३० " सिद्धं साम्प्रतमत्र वैदिकमिदं मानं वसिष्ठोदये
सिध्येत् स्वात्मनि संविदो जनिपदं सत्यं प्रमेयाश्रये ॥
तस्मादेव हि पुष्करस्थितिरसाज्जातो वसिष्ठो मुनिः
कुम्भाद् ब्रह्ममुखेन सत्वमनसः प्रादुर्भविष्णुर्ह्यजम् ॥ ३१ ॥

॥ एवमेव अगस्त्यस्यापि मैत्रावरुणत्वम् अयोनिजत्वं च सिद्धं भव

३१ " एवं योगबलेन दिव्यमहसां साकं वसिष्ठेन वै
सन् मैत्रावरुणो ऽप्ययोनिजतनुः कुम्भादगस्त्यो मुनिः ॥
स जातः श्रुतिमन्त्रदृक् सुतपसा प्रज्ञानयोगादृषिः
सञ्ज्ञानादिगुणो बभूव हि महान् सर्वार्यलोकप्रभुः ॥ ३१

॥ तद्वदेव आदिसृष्टौ मन्वादीनां तदनुक्रमात् -
तथा यमो वैवस्वतो अदितिप्रभृतीनां कश्यपपत्नीनां निर्माणं श्रूयते ॥
॥

२

३२ " तद्वत् सृष्टिमुखे सृष्टिआद्यस्य जातो स्वयम्भू मनुः
सावर्णिश्च चतुर्दशापि मनवो वैवस्वतोऽन्यो मनुः ॥
सूर्यो देवमयोनिजो भुवि यमः वैवस्वतो स यमी
देवर्षिः स नारदो दितिसुता स्तोक कश्यपाद्याः परे ॥ ३२ ॥

२

॥ इति प्रथमकला सम्पूर्णा ॥ (१)

२

योगिनाम योगिजातजनानां तनुभृतां
योगशान्तिलोकवर्तिनस्तवानां महोत्सवानां ॥
दैवतेन्द्रस्तवानां महात्मनां समानानां
दैवरात्रावप्रयोगमाध्यानां सुरासुराणाम् ॥ १ ॥

२